# ॥ श्रीराजराजेश्वरी पञ्चरत्नस्तोत्रम् ॥

AsthAnavidwAn shrIvidyAratnakara brahmashrI K P Shankara Shastrigal

मुक्ताजालविभूषिताङ्गलतिकां रक्ताम्बरालङ्कृताम्
मुक्तानन्दविधायिनीं मणिमयैस्ताटङ्कहारादिभिः ।
भक्तानां सुधियां प्रहर्षजननीं पद्मासनस्थायिनीम्
कारुण्यामृतवर्षिणीं हृदि दधे श्रीराजराजेश्वरीम् ॥१ ॥

श्रीमातृप्रमुखैः सहस्रललितानामोत्तमैरर्चिताम्
मन्दारादिसुमैरुपासककुलैः श्रीचक्रराजोज्ज्वलाम् ।
आधारादिनिविष्टदैवतगणैस्तोष्टूय्यमानां पराम्
शक्तिं कामदवामिनीं हृदि दधे श्रीराजराजेश्वरीम् ॥२ ॥

ब्रह्माणीप्रमुखामरेन्द्रवनितावृन्दैः समन्ताद्वृताम्
बिन्द्वग्रज्वलिताणिमादिकिरणैः देदीप्यमानां वराम् ।
पञ्चब्रह्ममयासनोपरिलसन्मूर्तिं सुवर्णाकृतिम्
सौवर्णाम्बरभूषितां हृदि दधे श्रीराजराजेश्वरीम् ॥३ ॥

मञ्जीरादिभिरञ्चितां कचभरप्रोत्तंससूनाञ्चिताम्

मध्ये फालतलं विशालतिलकां कान्तालकान्ताननाम् ।
मन्दस्मेरमुखीं दयार्द्रनयनोपान्तां सुबिम्बाधराम्
कुन्दप्राग्रदतीं सतीं हृदि दधे श्रीराजराजेश्वरीम् ॥४ ॥

श्रीविद्यां शशिभूषणां शिवमहाभाग्यस्वरूपां शिवाम्
काद्यर्णैस्तिथिसंख्यकैर्मुनिवरैराराधितां मानसे ।
शान्तान्तःकरणैः समर्चितपदाम्भोजद्वयामद्वयाम्
कामेशाङ्कनिवासिनीं हृदि दधे श्रीराजराजेश्वरीम् ॥५ ॥

इत्थं शङ्करशास्त्रिणा विरचितं श्रीराजराजेश्वरी
स्तोत्रं यः स्मृतिमान् पठेदनुदिनं श्रीराजराजेश्वरी ।
तस्यास्थाय पुरः श्रियं धियमियं पुष्टां सवम्शान्वयाम्
दद्यादिष्टमनन्यदैवसुलभं स्वात्मानुभूतेः सुखम् ॥६ ॥

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]